(594) "जसि रक्षणे" (X-चुरादिः-1667. सक. सेट्. उभ.)

मोक्षणे इति देवः। इदित्करणात् णिचो वैकल्पिकत्वम्।

'मोक्षणे जस्यतीति स्याण्णावत्रार्थे तु जंसयेत्।' (श्लो. 188) इति देवः।

[A]जंसकः-सिका, जिजंसयिषकः-षिका, जंसकः-सिका, जिजंसिषकः-षिका, जाजंसकः-सिका; जंसयिता-त्री, जिजंसयिषिता-त्री, जंसिता-त्री, जिजंसिषिता-त्री, जाजंसिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चपिधातुवत् (499) ज्ञेयानि।

(595) "जसु मोक्षणे" (IV-दिवादिः-1211. सक. सेट्. पर.)

'मोक्षणे जस्यतीति स्यात् णावत्रार्थे तु जंसयेत्॥

हिंसाताडनयोर्धात्वोः उदितोर्जासयेदिति।' (श्लो. 188-9) इति देवः।

जासकः-सिका, जासकः-सिका, जिजसिषकः-षिका, जाजसकः-सिका; जसिता-त्री, जासयिता-त्री, जिजसिषिता-त्री, जाजसिता-त्री;

इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकग्रसुधातुवत् (440) ज्ञेयानि। नञ्-पूर्वादस्माज्जसेः 'नमिकम्पिस्म्यजस—' (3-2-167) इति रप्रत्यये—[B]अजस्रम् इति भवति। अयं स्वभावात् क्रियासातत्ये वर्तते। अस्य धातोः परस्मैपदित्वात् दिवादित्वाच्च जस्यन्-न्ती, जसिष्यन्-न्ती-ती इति शतरि रूपाणीति विशेषः।

(596) "जसु हिंसायाम्" (X-चुरादिः-1669. सक. सेट्. उभ.)

उदित्करणाण्णिचो वैकल्पिकत्वम्।

'मोक्षणे जस्यतीति स्यात् णावत्रार्थे तु जंसयेत्॥

हिंसाताडनयोर्धात्वोः उदितोर्जासयेदिति।' (श्लो. 188-9) इति देवः।

जासकः-सिका, जिजासयिषकः-षिका, जासकः-सिका, जिजसिषकः-षिका, जाजसकः-सिका;

जासयिता-त्री, जिजासयिषिता-त्री, जसिता-त्री, जिजसिषिता-त्री, जाजसिता-त्री;

जासयन्-न्ती, जिजासयिषन्-न्ती, जसन्-न्ती, जिजसिषन्-न्ती; —

---

A. 'मद्याग्रपूर्वितनृपे शिशुना रणं वः स्यादेव मानवरिजंसकमीड्यधाम्नाम्॥' धा. का. 3.31.

B. 'अजस्रमास्फालितवल्लकीगुणक्षतोज्ज्वलाङ्गुष्ठनखांशुभिन्नया।' शि. पा. 1.9.